# ५०. हस्तिनापुरतीर्थस्तवनम् ।

अभिवन्द्य जगद्वन्द्यान् श्रीमतः **शान्ति-कुन्थ्वरान्** ।
स्तुत्यं वास्तोष्पतिस्तोमैः स्तौमि तीर्थं **गजाह्वयम्** ॥ १ ॥

शतपुत्र्यामभून् **नाभिसूनोः** सूनुः **कुरुर्नृपः** । **कुरुक्षेत्र**मिति ख्यातं राष्ट्रमेतत्तदाख्यया ॥ २ ॥
कुरोः पुत्रोऽभवद् **हस्ती** तदुपज्ञमिदं पुरम् । **हस्तिनापुर**मित्याहुरनेकाश्चर्यसेवधिम् ॥ ३ ॥
श्री**युगादि**प्रभोराद्या चोक्षैरिक्षुरसैरिह । **श्रेयांस**स्य गृहे पञ्चदिव्याढ्याऽजनि पारणा[1] ॥ ४ ॥
जिनास्त्रयोऽत्राजायन्त **शान्ति-कुन्थुरर**स्तथा । अत्रैव सार्वभौमर्द्धिं[2] बुभुजुस्ते महीभुजः ॥ ५ ॥
**मल्लि**श्च समवासार्षीत्तेन चैत्यचतुष्टयी । अत्र निर्मापिता श्राद्धैर्वीक्ष्यते महिमाद्भुता ॥ ६ ॥
भासतेऽत्र जगन्नेत्रपवित्रीकारकारणम् । भवनं चाऽ**म्बिका**देव्या यात्रिकोपप्लवच्छिदः ॥ ७ ॥
**जाह्नवी** क्षालयत्येतच्चैत्यभित्तीः स्ववीचिभिः । कल्लोलोच्छालितैर्भूयो भक्त्या स्नात्रचिकीरिव ॥ ८ ॥
**सनत्कुमारः** [3]**सुभूमो महापद्म**श्च चक्रिणः । अत्रासन् **पाण्डवाः** पञ्च मुक्तिश्रीजीवितेश्वराः ॥ ९ ॥
**गङ्गदत्तः कार्तिक**श्च श्रेष्ठिनौ **सुव्रत**प्रभोः । शिष्यावभूतां **विष्णुश्च नमुचे**रत्र शासिता ॥ १० ॥
कलिदर्पद्रुहं स्फीतसङ्गीतां सद्व्रसुव्ययाम् । यात्रामासूत्रयन्त्यत्र भव्या निर्व्याजभक्तयः ॥ ११ ॥
शान्तेः कुन्थोऽरव ( रस्य ) चतुष्कल्याणी चात्र पत्तने । जज्ञे जगज्जनानन्दा **सम्मेता**द्रौ च निर्वृतिः ॥ १२ ॥
भाद्रस्य[4] सप्तमी श्यामा नभसो नवमी शितिः । द्वितीया फाल्गुनस्यांत्या तिथ्योऽमूर्वो दिवश्च्युतेः ॥ १३ ॥
ज्येष्ठे त्रयोदशी कृष्णा माधवे च चतुर्दशी । मार्गे च दशमी शुक्ला तिथयो जनुषस्तु वः ॥ १४ ॥
शुक्रे चतुर्दशी श्यामा राधे बहुलपञ्चमी । महस्येकादशी शुभ्रा जज्ञुर्दीक्षादिनानि च ॥ १५ ॥
पौषस्य नवमी श्येनी तृतीया धवला मधोः । ऊर्जस्य द्वादशी श्वेता ज्ञानोत्पत्तेरहानि वः ॥ १६ ॥
शुक्रे त्रयोदशी कृष्णा वैशाखे पक्षतिः[5] शितिः । मार्गे वलक्षा दशमी मुक्तेर्वस्तिथयः क्रमात् ॥ १७ ॥
भवादृशानां पुरुषरत्नानां जन्मभूरियम् । स्पृष्टाऽप्यनिष्टं शिष्टानां पिनष्टि किमुत स्तुता ॥ १८ ॥

तादृग्विधैरतिशयैः पुरुषप्रणीतै-र्विभ्राजितं जिनपतित्रितयी[6] महैश्च ।
**भागीरथी**सलिलसङ्गपवित्रमेत-ज्जीयाच्चिरं **गजपुरं** भुवि तीर्थरत्नम् ॥ १९ ॥
इत्थं **पृषत्कविषयार्कमिते शकाब्दे** वैशाखमासशितिपक्षगषष्ठतिथ्याम् ।
यात्रोत्सवोपनतसंघयुतो यतीन्द्रः स्तोत्रं व्यधाद् **गजपुरस्य जिनप्रभाख्यः** ॥ २० ॥

**॥ इति श्रीहस्तिनापुरस्तवनम्, कृतिः श्रीजिनप्रभसूरीणाम् ॥**

॥ ग्रं० २१, अ० १६ ॥

---

1 Pa पारणे । 2 Pa C आ महिमाद्भुर्वभौमर्द्धिं । 3 P Pa सनत्कुमारसुभूमौ । 4 Pa भाद्रपदस्य । 5 Pa-c पक्षितिः । 6 B Pa त्रितयैः; C तृतीयैः ।